## राजा च प्रशंसायाम् । (६३/३७०७)

राजशब्दः पूर्वपदं शिल्पिवाचिनि उत्तरपदे प्रशंसायां [1]गम्यमानायाम् अन्यतरस्यां प्रकृतिस्वरं भवति । राजनापितः, राजनापितः । राजकुलालः, राजकुलालः । कर्मधारये राजगुणाध्यारोपेणोत्तरपदार्थस्य प्रशंसा । षष्ठीसमासे च राजयोग्यतया तस्य । राजा इति किम् ? परमनापितः । प्रशंसायाम् इति किम् ? [2]राजनापितः । शिल्पिनि इत्येव, राजहस्ती ॥

## आदिरुदात्तः । (६४/३७०८)

आदिरुदात्तः इत्येतदधिकृतम्[3] । इत उत्तरं यद् वक्ष्यामः तत्र पूर्वपदस्य आदिरुदात्तो भवति इत्येवं[4] तद्वेदितव्यम् । वक्ष्यति–'सप्तमीहारिणौ धर्म्येऽहरणे' (६. २. ६५/३७९९) इति । [5]स्तूपेशाणः । मुकुटेकार्षापणम् । याज्ञिकाश्वः । वैयाकरणहस्ती । [6]दृषदिमाषकः । आदिरिति प्रागन्ताधिकारात् (६. २. १४३/३८७७) । उदात्तः इति 'प्रकृत्या भगालम्' (६. २. १३७/३८७१) इति यावत् ॥

## सप्तमीहारिणौ धर्म्येऽहरणे । (६५/३७०९)

सप्तम्यन्तं हारिवाचि [7]च पूर्वपदं धर्म्यवाचिनि हरणशब्दादन्यस्मिन्नुत्तरपदे आद्युदात्तं भवति । [8]हारि इति देयं यः [9]स्वीकरोति सोऽभिधीयते । धर्म्यम् इत्याचारनियतं देयमुच्यते । धर्मो हि अनुवृत्त आचारः, [10]तस्मादनपेतं तेन वा प्राप्यम् इति । स्तूपेशाणः । मुकुटेकार्षापणम् । हलेद्विपदिका । हलेत्रिपदिका । दृषदिमाषकः । सञ्ज्ञायाम् इति सप्तमीसमासः, कारनाम्नि च (६. ३. १०/९६८) इति विभक्तेरलुक् । हारिणि – याज्ञिकाश्वः । [12]वैयाकरणहस्ती । मातुलाश्वः । पितृव्यगवः । क्वचिदयमाचारो व्यवस्थितः, स्तूपादिषु शाणादि दातव्यम्, याज्ञिकादीनामश्वादि इति ।

धर्म्ये इति किम् ? स्तम्बेरमः । [13]कर्मकरवर्धितकः । अहरणे इति किम् ? वाडवहरणम् । वडवायाः अयं वाडवः । तस्य बीजनिषेकादुत्तरकालं शरीरपुष्टयर्थं यद् दीयते हरणम् इति तदुच्यते । परोऽपि कृत्स्वरो हारिस्वरेण बाध्यते विप्रतिषेधेन इत्येतदहरणे इत्यनेन ज्ञाप्यते, तेन वाडवहार्यम् इति हारिस्वरः [14]सिद्धो भवति ॥

## युक्ते च । (६६/३८००)

युक्तवाचिनि च समासे पूर्वपदमाद्युदात्तं भवति । गोबल्लवः । अश्वबल्लवः । गोमणिन्दः । अश्वमणिन्दः । गोसङ्ख्यः । अश्वसङ्ख्यः । युक्तः इति समाहितः, कर्तव्ये तत्परो यः स उच्यते ॥

## विभाषा अध्यक्षे । (६७/३८०१)

अध्यक्षशब्दे उत्तरपदे विभाषा पूर्वपदमाद्युदात्तं भवति । गवाध्यक्षः, गवाध्यक्षः । अश्वाध्यक्षः, अश्वाध्यक्षः[15] ॥

---

1. अर्थे फ. ह. 2. राज्ञो नापितः इत्यधिकम् ह. 3. वेदितव्यम् इत्यधिकम् ग. क. 4. अधिकृतम् इत्यधिकम् फ. 5. सूर्येशाणः ड. 6. दृपदिमाषकः नास्ति फ. 7. च नास्ति फ. ह. 8. हरति इति हारि इत्यधिकम् ह. 9. स्वीकर्ता ह. 10. धर्म्यम् इत्यधिकम् फ. 11. शूर्पेशालः ड. 12. वैयाकरणहस्ती नास्ति फ. 13. वर्धितको नाम मूले स्थूलः अग्रे सूक्ष्मः ओदनपिण्डः कर्मकाराय दीयतेऽन्यथा कर्म न कुर्यात् इति धर्मः इत्यधिकम् फ. 14. ज्ञाप्यते क. ग. ह. 15. पूर्वेण नित्ये प्राप्ते वचनम् इत्यधिकम् फ.